श्रीसोमनाथसंस्कृतविश्वविद्यालयग्रन्थमाला - २

# वाक्यार्थज्योतिः
# Vākyārthajyotiḥ

अङ्कः - 1 वर्षः - 2014-15

प्रधानसम्पादकः
प्रो. अर्कनाथः चौधरी

सम्पादकौ
डॉ. ललितकुमारः पटेलः
डॉ. जानकीशरणः आचार्यः

श्रीसोमनाथसंस्कृतयुनिवर्सिटी
वेरावलम्

Scanned with CamScanner

# अमोघत्वं भवभूतेः

✍ प्रो. अर्चना दुबे

मानवीयमनोभावानाम् अन्तःस्थितेश्च यादृक् ससूक्ष्मं मनोवैज्ञानिकं विश्लेषणं भवभूतिना प्रस्तूयते, तदन्यत्र सुदुर्लभम्। नाट्यत्रयमस्य समुपलभ्यते-मालतीमाधवम्, महावीरचरितम्, उत्तररामचरितञ्च। व्याकरण-न्याय-मीमांसाशास्त्रेषु निष्णातत्वादेव "पद-वाक्य-प्रमाणज्ञः" इत्युपाधिसमलङ्कृतोऽभूत्। उत्तररामचरिते भवभूतेर्नाट्यकलायाः कवित्वस्य च चरमोत्कर्षो लक्ष्यते। उत्तररामचरिते तु भवभूतिः करुणरसप्रवाहे कालिदासादपि अतिरिच्यते। अत एव उत्तरे रामचरिते भवभूतिर्विशिष्यते इत्युक्तिः प्रथिताऽभूत्।

**उत्तररामचरितनाटके सप्त अङ्काः सन्ति -**

प्रथमाङ्कः - चित्रदर्शनम्
द्वितीयाङ्कः - पञ्चवटीप्रवेशः
तृतीयाङ्कः - छायाङ्कः
चतुर्थाङ्कः - जनककौसल्यायोगः
पञ्चमाङ्कः - कुमारविक्रमः
षष्ठाङ्कः - कुमारप्रत्यभिज्ञानम्
सप्तमाङ्कः - गर्भाङ्कः[१] (सम्मेलनम्)

उत्तररामचरिते अङ्गीरसः करुण एव। भवभूतेः अभिमतं यत् सर्वेषां रसानां करुणमूलत्वम्।[२] करुणरसादेव सर्वेषां रसानाम् आविर्भावः। अत एव 'कारुण्यं भवभूतिरेव तनुते' इति तस्य यशो जेगीयते। उत्तररामचरितस्य सर्वतोऽधिकं वैशिष्ट्यम् अस्ति यत् तत्र दाम्पत्यस्य अद्वितीयं लक्षणं भवभूतिना दत्तम्। मनुनाऽपि व्यादिश्यते यत् यत्र दम्पत्योः सामञ्जस्यं परस्परं सन्तुष्टिश्च विद्यते तत्रैव कल्याणाधिवासः।[३] रामायणेऽपि एकपत्नीव्रतं प्रतिपाद्यते। अत एव सीतापरित्यागानन्तरं न रामो विवाहान्तरं

Scanned with CamScanner

विदधते।[४] साऽर्धाङ्गरूपिणी प्रियतमा सखी च गण्यते।[५] उत्तररामचरिते उक्तं यत् -

**अद्वैतं सुखदुःखयोरनुगतं सर्वास्ववस्थासु यद्-**
**विश्रामो हृदयस्य यत्र जरसा यस्मिन्नहार्यो रसः ।**
**कालेनावरणात्ययात्परिणते यत्स्नेहसारे स्थितं**
**भद्रं तस्य सुमानुषस्य कथमप्येकं हि तत्प्राप्यते ॥[६]**

दाम्पत्यं सुखे दुःखे च एकरूपमस्ति। सम्पद्-विपद्-रूपावस्थानुगुणं च भवति। दाम्पत्ये चेतसः क्लेशापगमः भवति यत्र प्रीतिः वार्द्धक्येन हर्तुम् अशक्या अर्थात् वार्द्धक्येऽपि रसशून्यता न भवति। विवाहादारभ्य मृत्युपर्यन्तं सङ्कोचरूपावरणापगमरूपं दाम्पत्यजीवनं भवतीति कोविदाः व्याख्यायन्ते। दाम्पत्यजीवने परिपक्वप्रेम्णः उत्कृष्टा स्थितिः दृग्गोचरीभवति। तस्य दाम्पत्यस्य अनिर्वचनीयम् अद्वितीयं कल्याणम् अतिकृच्छ्रेण लभ्यते। अत एव उत्तररामचरिते रामः कथयति यत् तादृक् दाम्पत्यं दुर्लभं खलु जगति, किन्तु मम तु सिद्धम्। अतोऽहो मे भाग्यमिति। एवं दाम्पत्यस्य अनुपममिदं लक्षणं दत्तवान् भवभूतिः।

**अपत्यसम्बन्धः -**

एवमेव अपत्यस्य भारतीयसंस्कृत्यनुसारेण परिभाषा प्रदत्ता भवभूतिना। जायापत्योर्वात्सल्यैकास्पदत्वात् तयोरन्तः करणरूपतत्त्वस्य हृदयपदार्थस्येत्यर्थः। अपत्यं नाम अयम् अनुपमः आनन्दग्रन्थिः विधात्रा बध्यते। तेन बन्धनेन नित्यमानन्द एव दम्पतीभ्यामनुभूयते न तु दुःखमिति तद् बन्धनस्य वैलक्षण्यमिति आशयः।

**अन्तःकरणतत्त्वस्य दम्पत्योः स्नेहसंश्रयात् ।**
**आनन्दग्रन्थिरेकोऽयमपत्यमिति पठ्यते ॥[७]**

जायापत्योः अन्तःकरणरूपतत्त्वस्य स्नेहस्य एकास्पदत्वात् (आश्रयात्) एतद् अद्वितीयम् आनन्दमयबन्धनं सन्ततिः कथ्यते।

**पति-पत्नीसम्बन्धः -**

स्त्री पत्युरर्धाङ्गरूपा। अत एव साऽर्धाङ्गिनीशब्देन व्यवह्रियते। पत्नीमन्तरेण न यज्ञस्य पूर्णत्वं स्वीक्रियते। अयज्ञो वा एषः। योऽपत्नीकः,[८] जाया गार्हपत्योऽग्निः।[९] उत्तररामचरितेऽपि उक्तं-'हिरण्मयी सीताप्रतिकृतिः,[१०] हिरण्मय्याः प्रतिकृतेः पुण्यां प्रकृतिमध्वरे' इति।[११]

**तव मूर्तिमानिव महोत्सवः करः ।**[१२]

सीता - स्मरति वा तं प्रदेशमार्यपुत्र?

रामः - अयि कथं विस्मर्यते?

**त्वमुरसि मम कृत्वा यत्र निद्रामवाप्ता ।**[१३]

सुखप्रदाः पूर्वमनुभूता घटना इदानीं स्मारयति-

**किमपि किमपि मन्दं मन्दमासत्तियोगाद् ।**[१४]

दम्पत्योः प्रीतिः अनिर्वचनीया भवति । तयोः परस्परं प्रीतियोगं हृदयमेव जानाति । अत एव सीतायाः प्रत्येकं स्पर्शः रामस्य कृते अनिर्वचनीयोऽस्ति । तदेव दर्शयति भवभूतिः उत्तररामचरिते-

**विनिश्चेतुं शक्यो न सुखमिति वा दुःखमिति वा**
**प्रमोहो निद्रा वा किमु विषविसर्पः किमु मदः ।**
**तव स्पर्शे स्पर्शे मम हि परिमूढेन्द्रियगणो**
**विकारश्चैतन्यं भ्रमयति च सम्मीलयति च ॥**[१५]

रामोऽनुभवति यत् तव स्पर्शानन्दं प्राप्य मम अन्तःकरणस्य अनिर्वचनीयावस्थाऽभवत् । तथैव सीता अनुभवति यत् विवाहकालादारभ्य अद्यावधि मयि भवतामनुरागः समान एव । अतोऽस्मादधिकं सन्तोषप्रदं मम किं भविष्यति ? इमामेव अनिर्वचनीयां प्रीतिं भवभूतिः उत्तररामचरिते सीतामुखात् प्रकटयति -

सीता - **स्थिरप्रसादा यूयम्, इत इदानीं किमपरम् ।**

रामः कथयति यत् तव सुवचनं मम प्राणसर्वस्वम् अस्ति-

**म्लानस्य जीवकुसुमस्य विकासनानि**
**सन्तर्पणानि सकलेन्द्रियमोहनानि ।**
**एतानि ते सुवचनानि सरोरुहाक्षि!**
**कर्णामृतानि मनसश्च रसायनानि ॥**[१६]
**आ विवाहसमयाद् गृहे वने शैशवे तदनु यौवने पुनः ।**
**स्वापहेतुरनुपाश्रितोऽन्यया रामबाहुरूपधानमेष ते ॥**[(१७)]

**न रामः परदारान् वै चक्षुर्भ्यामपि पश्यति इति प्रसिद्धिः । मद्बाहुरित्यस्य प्रयोगो नाभवत् । यतो हि रामस्य एकपत्नीव्रतस्य प्रसिद्धेः सूचना अत्र व्यङ्ग्याऽस्ति ।**

Scanned with CamScanner

**इयं गेहे लक्ष्मीरियममृतवर्तिर्नयनयोः**
**किमस्या न प्रेयो यदि परमसह्यस्तु विरहः ॥**[१८]

"परमसह्यस्तु विरहः" इत्युक्तं राघवेण, ततः प्रतिहार्या प्रोक्तं "देव उपस्थितः" इति। एतेन सीताविरहः भवन्तम् अचिरादेव उपस्थास्यति इति अव्यक्तार्थम् अर्थोपक्षेपकं वस्तु। चोक्तं साहित्यदर्पणे-

**अर्थोपक्षेपकं यस्तु लीनं सविनयं भवेत्।**
**श्लिष्टप्रत्युत्तरोपेतं तृतीयमिदमुच्यते ॥**[१९]

धनिकमते तु उत्तरचरितमेतत् गण्डनामकं प्रस्तावनाङ्गं वेदितव्यम्। प्रस्तुतस्य सीताविवासनस्य सम्बद्धतया विरहस्य सहसाऽभिधानात्।

नृपस्य प्रजानां सम्बन्धः उत्तररामचरिते कुशलतया दृश्यते-

**स्नेहं दयां च सौख्यं च यदि वा जानकीमपि।**
**आराधनाय लोकस्य मुञ्चतो नास्ति मे व्यथा ॥**[२०]

रामः सीतां सर्वदैव परमां पवित्रामिति मनुते। अत एव प्रथमेऽङ्के चित्रदर्शने यदा लक्ष्मणः कथयति - "यावदार्याया हुताशनशुद्धिः इति तदा श्रीरामः वदति-"शान्तं पापम्" इति। इत्युक्ते श्रीरामः सीतायाः अग्निपरीक्षाविषये किमपि श्रोतुं नेच्छति। अतः रामः अग्रे कथयति-

**उत्पत्तिपरिपूतायाः किमस्याः पावनान्तरैः।**
**तीर्थोदकं च वह्निश्च नान्यतः शुद्धिमर्हतः ॥**[२१]

सीता चित्रवीथीं दृष्ट्वा स्वयमेव वनगमनस्य इच्छां प्रकटीकरोति। तद्यथा-

आर्यपुत्र ! **एतेन चित्रदर्शनेन प्रत्युत्पन्नदोहदाया मम विज्ञापनीयमस्ति।**

राम - **ननु आज्ञापय।**

सीता - **"जाने पुनरपि प्रसन्नगम्भीरासु वनराजिषु विहृय पवित्रनिर्मलशिशिरसलिलां भगवतीं भागीरथीम् अवगाहिष्य इति।"**[२२]

सीताहरणादिरूपवृत्तान्तं स्मारयितुमाह लक्ष्मणः -

**अथेदं रक्षोभिः कनकहरिणच्छद्मविधिना**
**तथा वृत्तं पापैर्व्यथयति यथा क्षालितमपि।**

Scanned with CamScanner

**जनस्थाने शून्ये विकलकरणैरार्यचरितै-**
**रपि ग्रावा रोदित्यपि दलति वज्रस्य हृदयम् ।।**[२३]

छद्मप्रयोगेण रावणः सीताम् अहरत् । तद्वियोगः- विषण्णस्य दाशरथेः स्थितिम् अवधार्य ग्रावाणोऽपि सहजां धीरतां मुञ्चन्ति, वज्रस्यापि मानसं मार्दवं संश्रयते । सीता सर्वदैव उक्तवती यत्-

**अहो, दिनकरकुलानन्दन एवमपि मम कारणात् क्लान्त आसीत् ।**

छायाङ्केऽपि एवमेव अस्ति -

**मां मन्दभागिनीं व्याहृत्यामीलितनेत्रनीलोत्पलो मूर्च्छित एव ।**

तदा तमसा कथयति सीतां प्रति-

**त्वमेव ननु कल्याणि ! सञ्जीवय जगत्पतिम् ।**
**प्रियस्पर्शो हि पाणिस्ते तत्रैष निरतो जनः ।।**[२६]

तदा सीता वदति - (किञ्चित्सहर्षम्) **जाने पुनः प्रत्यागतमिव जीवितं त्रैलोक्यस्य ।**

रामस्य सन्तापजां स्थितिं कथमिव कविः सजीवरूपेण चित्रयति । तस्य हृदयं शोकाद् विदीर्यते, परं न द्विधा छिद्यते; मोहागमेऽपि चैतन्यं नोज्झति; शोको देहं दहति, न च भस्मसात् कुरुते; विधिर्मर्मच्छेदनं विधत्ते, न तु जीवितं समापयति ।[२७] शम्बूकप्रसङ्गेन दण्डकारण्यं पञ्चवटीं च प्राप्य जानकीसहवासं स्मारं स्मारं खिद्यतेतमां मनो मानिनो रामस्य । रामोऽभिधत्ते-

**चिराद् वेगारम्भी प्रसृत इव तीव्रो विषरसः ।**
**पुराभूतः शोको विकलयति मां नूतननमिव ।।**[२८]

रामो जानकीं सम्बोधयन् स्वीयाम् असह्यवेदनां विशदयति । समग्रां जगद् अन्धतामिस्रं प्रतीयते, मोहश्च निश्चैतन्यं प्रथयति ।

**हा हा देवि ! स्फुटति हृदयं ध्वंसते देहबन्धः**
**शून्यं मन्ये जगदविरलज्वालमन्तर्ज्वलामि ।**
**सीदन्नन्धे तमसि विधुरो मज्जतीवान्तरात्मा**
**विष्वङ्मोहः स्थगयति कथं मन्दभाग्यः करोमि ।।**[२९]

सीताहरणाद् अनन्तरमपि वियोगो जायते परं तत्र करुणरसो नास्ति, किन्तु

Scanned with CamScanner

विप्रलम्भोऽस्ति। यतो हि प्रथमवियोगे पुनर्मेलनस्य आशा अस्ति। सीतात्यागादनन्तरं यः वियोगो जायते तत्र तु पुनर्मेलनस्य आशा एव नास्ति। अतः निरवधिकोऽयं वियोगः । तस्मात् अत्र करुणरसः। उत्तररामचरिते श्रीरामः स्वयमेव विप्रलम्भकरुणयोर्मध्ये भेदं निरूपितवान्। यथा-

**उपायानां भावादविरलविनोदव्यतिकरैः**
**विमर्दैर्वीराणां जनितजगदत्यद्भुतरसः ।**
**वियोगो मुग्धाक्ष्याः स खलु रिपुघातावधिरभूत्**
**कटुस्तूष्णीं सह्यो निरवधिरयं तु प्रविलयः ॥**[३०]

प्रथमो वियोगस्तु रिपुघातपर्यन्तमासीत्। स विप्रलम्भश्रृङ्गारस्य उदाहरणमस्ति। अपरो वियोगः "निरवधिरयं तु प्रविलयः" अस्मात् कारणात् करुणरसस्य उदाहरणमस्ति। साहित्यदर्पणकारः विश्वनाथः करुणविप्रलम्भश्रृङ्गारयोर्मध्ये भेदं दर्शितवान्।

**शोकस्थायितया भिन्नो विप्रलम्भादयं रसः ।**
**विप्रलम्भे रतिः स्थायी पुनः सम्भोगहेतुकः ॥**[३१]

करुणरसस्य स्थायिभावः शोकोऽस्ति, विप्रलम्भशृङ्गारस्य च स्थायिभावः रतिः। यतो हि विप्रलम्भे पुनर्मेलनस्य आशा भवत्यैव। भरतमुनिः विप्रलम्भस्य कृते सापेक्षत्वं करुणस्य कृते निरपेक्षत्वं चोक्तवान्। "**करुणस्तु शापक्लेशविनिपतितेष्टजन-विभावनाश-वध-बन्धसमुत्थो निरपेक्षभावः। औत्सुक्यचिन्तासमुत्थः सापेक्षभावो विप्रलम्भकृतः। एवमन्यः करुणोऽन्यश्च विप्रलम्भ इति ॥**"[३२]

केचन आचार्याः मृत्योः अनन्तरं पुनः समागमनात् करुणविप्रलम्भरसं स्वीकुर्वन्ति। यथा साहित्यदर्पणकारेण उक्तम्-

**यूनोरेकतरस्मिन् गतवति लोकान्तरं पुनर्लभ्ये ।**
**विमनायते यदैकस्ततो भवेत् करुणविप्रलम्भाख्यः ॥**[३३]

कादम्बर्यां पुण्डरीकमहाश्वेतावृत्तान्ते करुणविप्रलम्भस्य उदाहारणं द्रष्टुं शक्यते। पुनरलभ्ये शरीरान्तरेण वा लभ्ये। मम्मटाचार्यादयः करुणविप्रलम्भशृङ्गारस्य न कमपि भेदं स्वीकृतवन्तः।

**रसानां सुख-दुःखरूपत्वम्-**

धनिकधनञ्जयविश्वनाथादयः सर्वेषां रसानां नितान्तसुखरूपत्वं स्वीकुर्वन्ति।

Scanned with CamScanner

विश्वनाथेन साहित्यदर्पणे प्रतिपादितं यत् करुणादौ अपि अत्यन्तं सुखं जायते तस्मिन् विषये सहृदयानाम् अनुभूतिरेव प्रमाणमस्ति ।

**करुणादावपि रसे जायते यत्परं सुखम् ।**
**सचेतसामनुभवः प्रमाणं तत्र केवलम् ॥**
**किञ्च तेषु यदा दुःखं न कोऽपि स्यात् तदुन्मुखः ।**
**तथा रामायणादीनां भविता दुःखहेतुता ॥**[३४]

उत्तररामचरितं भवभूतेः नाट्यप्रतिभायाः सर्वोत्तमनिदर्शनमस्ति। अस्मिन् नाटके रामायणस्य उत्तरार्धं प्रदर्शितमस्ति। रामस्य वनात् प्रत्यागमनानन्तरं राज्याभिषेकादारभ्य सीतामिलनपर्यन्तं सम्पूर्णकथा प्रदर्शिता अस्ति । वाल्मीकीयरामायणे सीतायाः पातालगमनात् रामकथा दुःखपर्यवसायिनी अस्ति, परन्तु भवभूतिः नाट्यपरम्परायाः अनुकरणं कृत्वा उत्तररामचरितं सुखात्मकं निर्मितवान् ।

नाट्यसौविध्यदृष्ट्या कथानके प्रथमाङ्के चित्रदर्शनम्, तृतीयाङ्के छायासीतायाः कल्पना, चतुर्थाङ्के वाल्मीक्याश्रमे कौशल्या-जनकादीनां सम्मेलनम्, सप्तमाङ्के गर्भनाटकयोजना, सीता-रामयोः समागमश्च इत्यादयः बहवः कथाभागाः कविकल्पनाविलासप्रसूताः सन्ति ।

नाटके भावपक्षस्य प्राधान्यमस्ति। मानवीयमनोभावानां विश्लेषणे मार्मिकचित्रणे च भवभूतिः अद्वितीयो वर्तते । भवभूतेः प्रत्येकमपि पात्रं सांस्कृतिकमादर्शम् उपस्थापयति । नाट्यपात्रेषु सजीवता, सक्रियता, स्फूर्तिः, उत्साहः, भावप्रकाशनस्य अद्भुतसामर्थ्यं, सङ्घर्षशक्तिश्च विद्यते । तेषु मानवोचिताः सर्वेऽपि गुणाः दृश्यन्ते । सीतावियोगे रामस्य करुणविलापः, लवकुशयोः बालोचितचाञ्चल्यं किन्तु गुरून् प्रति आदरभावः, तमसा-आत्रेयी-वासन्ती-मुरला इत्यादिषु नार्योचितगुणानां स्वाभाविकवर्णनं समुपलभ्यते ।

रामः आदर्शप्रजापालकः, सीता पतिव्रता आदर्शभारतीयाङ्गना चास्ति। भवभूतेः नाट्यपात्रेषु गम्भीरता, भावुकता, आदर्शवादिता, आत्मसंयमः कर्त्तव्यनिष्ठा सर्वत्र दृश्यते । विदूषकस्याभावात् नाटके गाम्भीर्यं परिलक्ष्यते । जगतो विनश्वरतां प्रेक्ष्य-प्रेक्ष्य भवभूतेः कारुण्याप्लुता रसधारा प्रसरति। स रामकथाम्, प्राधान्येन सीता-परित्यागम् आश्रित्य स्वीयां भावनां मूर्त्तरूपेण उपस्थापयति । तस्य वाचि तादृग् वीर्यं यथा न केवलं वृक्ष-वनस्पत्यादयः, अपि तु पर्वतरोदनक्षमताऽपि[३५] दरीदृश्यते। नीरसोऽपि जनः

Scanned with CamScanner

उत्तररामचरितम् अधीत्य नूनं वाष्पाकुलेक्षणो भविता इति निश्चप्रचम्।

भवभूतिः मानवीयसम्बधानां कविः अस्ति। दाम्पत्यचित्रणे, अपत्यवर्णने, करुणरसवर्णने, मानवीयसम्बन्धानां चित्रणे, मनोवैज्ञानिकविश्लेषणे, प्रकृतिचित्रणे, शिखरिणीछन्दसः निदर्शने भवभूतेः अमोघत्वं वर्तते।

***

## पादटिप्पणयः

१. अङ्कोदरप्रविष्टो यो रङ्गद्वारमुखादिमान्। अङ्कोऽपरः स गर्भाङ्कः सबीजः फलवानपि ॥
- साहित्यदर्पणः ६.२०

२. एको रसः करुण एव निमित्तभेदाद् भिन्नः पृथक् पृथगिवाश्रयते विवर्तान् ॥
आवर्तबुद्बुदतरङ्गमयान् विकारान् अम्भो यथा सलिलमेव हि तत्समग्रम् ॥
- उत्तररामचरितम्, ३.४७

३. सन्तुष्टो भार्यया भर्ता भर्त्रा भार्या तथैव च। यस्मिन्नेव कुले नित्यं कल्याणं तत्र वै ध्रुवम् ॥
- मनुस्मृतिः ३.६०

४. न सीतायाः परां भार्यां वव्रे स रघुनन्दनः। - रामायणम् ७.९७.७

५. महाभारतम्, १.७४.४०

६. उत्तररामचरितम्, १.३९

७. उत्तररामचरितम्, ३.१७

८. तैत्तिरीय०, २.२.२.६

९. ऐत. ब्रा. ८.२४

१०. उत्तररामचरितम् २.७

११. उत्तररामचरितम् ७.१९

१२. उत्तररामचरितम् १.१८

१३. उत्तररामचरितम् १.२४

१४. उत्तररामचरितम् १.२७

१५. उत्तररामचरितम् १.३५

१६. उत्तररामचरितम्, १.३६

१७. उत्तररामचरितम्

१८. उत्तररामचरितम् १.३८

१९. साहित्यदर्पणः, ६.४८; यत्रार्थे चिन्तितेऽन्यस्मिन् तल्लिङ्गोऽन्यः प्रयुज्यते। आगन्तुकेन भावेन पताकास्थानक तु तत्। - साहित्यदर्पणः, ६.४५

Scanned with CamScanner

२०. उत्तररामचरितम् १.१२
२१. उत्तररामचरितम् १.१३
२२. उत्तररामचरितम्, प्रथमाङ्कः पृ. ८०
२३. उत्तररामचरितम् १.२८
२४. उत्तररामचरितम्, प्रथमाङ्कः - गद्यम्
२५. उत्तररामचरितम्, ३ गद्यम्
२६. उत्तररामचरितम् ३.१०
२७. दलति हृदयं शोकोद्वेगाद् द्विधा तु न भिद्यते वहति विकलः कायो मोहं न मुञ्चति चेतनाम्। ज्वलयति तनूमन्तर्दाहः करोति न भस्मसात् प्रहरति विधिर्मर्मच्छेदी न कृन्तति जीवितम्।। - उत्तर० ३.३१
२८. उत्तररामचरितम् २.२६
२९. उत्तररामचरितम् ३.३८
३०. उत्तररामचरितम् ३.४४
३१. साहित्यदर्पणः, ३.२२६
३२. नाट्यशास्त्रम् ६.४५ पृ. ३०७
३३. साहित्यदर्पणः ३.२०९
३४. साहित्यदर्पणः ३.४-५
३५. भवभूतेः सम्बन्धाद् भूधरभूरेव भारती भाति। एतत्कृतकारुण्ये किमन्यथा रोदिति ग्रावा।। - आर्यासप्तशती, १.३६

***